This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ संसक्तानि वपानुमौपनिषद्व्याहारमा ॥ धीरस्सानुन्मां दृष्ट्वा व्रजसुंदरीकु
चतटीपाटीररेणुनिरव ॥ उन्मीलन्मुरलीनिनादबहुलामोदोपसींदुरुवीजिह्वालिढमल्ली
कबह्लवन्निवेशः पादांबुजं पातु वः ॥ १ ॥ अपि च ताम्याकस्परज्ञः प्रमज्ज्यन्वरणदत्तामयायाच
कोनिर्मल्यस्तनकुंभेत्वचनांसितपत्रांकुरोनिर्मितः ॥ स्वच्छंदविहरतिज्ञल्पितगिरंसाकु
तमालीजनं दृष्ट्वाकेवलमाघ्नतीकुटिलया दाक्षायणी पातु वः ॥ २ ॥ नांद्यंते सूत्रधारः ॥
गत्वोवलोक्याग्रवक्ताशास्त्राणांभरतमतसिद्धांतनिपुणः ॥ समुत्कर्षस्थानं सरसकविता
याः कवविनांप्रपन्नातांश्रेयः प्रगुणयति पुण्यैकसुलभः समाजः साधूनामयमखिलवंद्य
श्च नचत्ति ॥ ३ ॥ तदस्मैश्लाघनीयगुणमूर्विश्वपकुलक्रमादागतामभिनयविद्यां भरताचार्य
मतानुसारेण सांप्रतमुपहरन्नात्मानं कृतार्थयिष्ये ॥ आकाशे लक्ष्यं बध्वा ॥ भो भो सामाजिकाः
किं ब्रूथ सरलोयत्र संदर्भः सरसश्चार्थबंधनं ॥ तन्त्रस्त्वया नि नेतव्यरूपकं न च निर्मितमिति आ
श्चर्यं भोः स्वयमनोवृत्तिरियं तावद्यत्रानुषंजति स्वयं समाजस्य नियोगोपि तत्रेति विधिनाजितं ॥ ५ ॥

राम
१

Acc. No. ~~1468~~. M1460
Title – जानकीपरिणय (अपूर्ण)
Author – ∅ चोक्कनाथ.
Date – ?
Sub – ड्रामा.
folio – 22
Xerox – 42

K K S U LIBRARY
RAMTEK
441 106
M 1460
Dist. Nagpur

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेपथ्याभिमुखमवलोक्य आर्य इतस्तावत्प्रविश्य नटी अज्जउत्त एसम्हि। सू० अपिश्रुत
मार्षभमार्यमिश्राणां न० निश्वस्यासूयं किंदु तुए बहिणीए दुत्तस्स कलहंसस्स उव्वाहनिमित्तेण
विघ्घ्रस्य कणयकमलिणिं दुच्चिणीदो मए णामयिणाम कुसीलवो मारए एक कलहंसवसं करिअ णो
हरिस्सदित्ति संकणियदित्ता कमलिणी एणि विघ्घो मणोरहो अविस्सदित्ति बाबुलस्ति। सू० अलं
विचारेण। मया खलु बृहद्भल्लो नाम मैत्रीलुप्तः कमलिनीकलहंसयोः संघटने प्रतिभूः कृतः। अस्त
रूपं ह्यो रक्तल्यं तथापि क्रयायिष्यति। विघ्नेव कलहंसं नतस्मादेष यथाधिकृ। ह्रा तस्मात्स्व
पतां परिषदाराधनायामुमेव वसंतसमयमाधिकृत्य संगीतकं। संप्रति हि। चंचूपुटे नवदलस्यनवं
प्रवालं पार्श्वस्थितां प्रणयिनीमनुपर्तमानः। पक्षानिलैः परन्तोयमलीन्विधूयकूजन्नरसालशि
खरेक रतो विहगाः न०। एवं होदु किंदु जारिसं आणत्तं अज्जमिस्साणं तारिसं रूवयं उणो सिक्खत्तीए मए
न लद्धीय अदि। सू०। विहस्य किं न स्मरसि तं भवभूतिनिर्मितं जानकीपरिणयं नाम रूपकमध्या
पितासि। न०। सहर्षं। दिट्ठिआ त्थाणी अणुबोहिअम्हि अज्ज जेण। जस्स खु कविप्पबंधस्स केम्महाणुभावा
दो ज्जप्परामदो। खिदादो दुप्पषो अथवादो विअ चंदो रामभद्दमपि विंदो। सू०। सम्यगनुस्मारितं भवत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यस्तोत्रिमतिंमनीषिसदसिश्रीनीलकंठाध्वरीकौंडाजोतिषिकाभ्वयस्यकुरुतेसंभ्माणमार्यैः स
मायत्रानुग्रहदृष्टिमर्पयतिस्वश्रीबालकृष्णोगुरुः । सोयंदिव्यतिश्वोक्तनाथमखिनामकीतदासः कविः ।७।
पद्मपदानी । विदितः कविश्रंबधोरघुवीरचरित्रवर्णनपवित्रः । परिषद्सोन्मुखीयंममसर्वेषांभाग्यपरि
णामः ।८। तत्प्रियतांतावत् । न० । तहइत्तिगार्यातादाणींखुवल्कयमालारवेणोखुइत्थिआपसाधीं३। रमण
स्सपरिमलोजायस्सरदंतेसमंणिवारेई ।९। अविअ । कोल्लारभसकिलदाआपमदाओगवरखपदणी
दोसिसिरंसमेंठसमणादोमल्लयसमूमिरणंपसंसंदि ।१०। अण्णंच । एउइदुंधीरोभयवपथुंनाटयन्ति । सू०
पश्यामितवगानेनरसंभावचित्रार्पितामिवगाढितन्यपिकिमिदमकांडेभीरुवपरसे ।११। न० । किंनप्पेरखवसि ।
एसोररखवसोवैरादूएवउआअघदित्ताकुदोणवेपास्ति । इत्यन्यतोगच्छति । सू० हद्धू । अयंनभेतव्यं२ एषोद
ग्राननानुचरस्ससारणस्यभूमिकामादायरंगत्तलप्रविशतीमित्तावः । तदावामपिड़नंतरकरणायस
ज्जीभवावइतिनिष्क्रांतौ । प्रस्तावना ।। ततः प्रविशतिसारणः२ पुरतोवलोक्यसहर्षं । अयंकिलस्फुरा राम
सुरखंदितचरणारविंदेनस्वामिनामहाराजरावणेनमिथिलांप्रतिप्रहितोरत्नांतवर्द्धीशुकः समाप
तति । प्रविश्यशुकः । कथमार्यः सारणः । सारणः । अपिकुशलंतवनियोगस्य । शुकः । यावेदत्तत्कृपयामिन २
वानिदानींकथप्रस्थित । सा० । आज्ञप्तोस्मिदेवेनाशु० । कथमिवासा० । यथाश्रूयतेहिदेवयजनसंभवात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकयत्लावण्यसारमयीसीतानामजनकस्यधर्मतस्तनया। तांकिलभवतामदर्थ्यमनुवैयोक्त
व्याजनकराजइतिश्रु॰ अहोतातादृशस्यापिदेवस्यमानुषेष्वप्ययमेवाविनयारंभः। अथवा। पांसुक्रीडा
भवतिहिमिनिवाः कैकसीसंभवस्यपस्वैरंयुस्यात्रिदशानतरुणीदृष्टदबंदीगृहोपिसोयंसीताप्रसभह
रणंयत्रचित्तेविधत्तेदैवप्रीतिंतदिहजनकेनस्तमेषानुरुंधे॥१२॥सा॰ अथकिं। श्रु॰ श्रूयतामार्य
तावदिहस्याप्रवृत्तिः। स॰ कथय। श्रु॰। साकन्याभुवनैकमंगलगुणारामेनुरक्तास्वयंश्रुत्वात्तज्जन
केनचाभ्युपगतंवंशप्रतिष्ठाविदा॥ किंचानेनवरोपसंग्रहविधौभीतेनलंकापतेःसंस्वर्गप्रतिस
र्गसाहसनिधिर्योगीवृतोलग्नकः॥१३॥सा॰। सामर्षविस्मितं। अहोसमयस्यवैषम्यं। यतअत्र
स्मत्स्वामिनिप्राज्जर्वेविदेहाधिपतौचकौटिल्यं। भवतु। ततः। श्रु॰। प्रस्थितस्सवसमुनिरात्मनोदेव
यजनमपदिश्यसपुत्रदारंदशरथमुपनिमंत्रयितुं। जनकराजोपिप्रथमंनिमंत्रितःस्वानुजंकुशध्व
जंमिथिलायामवस्थाप्ययज्ञदर्शनव्याजेनकन्यासहितःकौशिकाश्रममुपगतः। सा॰। तदनेनतीर्थे
नसीतारामयोःपाणिग्रहणंनिर्वर्तयिष्यतीतिमन्ये। भवतुयथातथावा। राजनिदेशमाचरितुंकौशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काश्यममेवप्रतिगमिष्यावः।यत्रसज्जनकराजःप्रतिवसति।शु॰।प्रतिगमनेकिंप्रयोजनं।सा॰।मा
मेवावंशो।धातुर्मेशतिजननेविघ्नकृता।श्रीसमृद्धिपस्यान्यत्किंश्रातमुखशिरःशेखरंन्यासनंचाक
न्या।पीत्त्वेरूपमभिमतंकस्यनेदं।शु॰।तथापिप्रख्यातुंसभवतिनिजापरस्यचिन्तानुरोधातु।
१९४।सा॰।क्षणंविच्छिन्त्य।मातुर्देवक्षितममुष्यकुलंप्रसिद्धंकिंनकृतानिश्चरितान्यपिविश्वजे
तुः।देवंविहायदशाकंठमकुंठसत्वंसीताकथंरतिमधत्तमनुष्यपोते।१९५।दीर्घंनिःश्वस्यत
दिहाविघटनीयःप्रभावैर्दह्यकन्यायादाशरथोस्नेहानुबंधः।घटनीयश्चपुनरस्मत्स्वामिनि।
शु॰।नहिदंसंभाव्यते।सा॰।तस्करवाभ्युपायःसीताधिगमइतिचिंतांनाटयन्सहर्षं।मायारामवपु
र्धरेणविभुनासाचित्रत्लाव्याधुनायकूएंहतिहरेनवाकुरूनयावाराक्षसाःसुंदरीः।ऐश्वर्यपरि राम
णेतुरूर्जितमथोदृष्ट्वाप्रहृष्टांस्कृतांश्रण्वन्श्रीतिमसोगमिष्यतिवरेमाहेश्वरमैथिलः।।१९६।।अनंतः
कौशिकचेत्रेणविघुज्जिह्वेनरामवेषेणराज्ञारावणेनचजनकसमीपंप्रवेशयितव्यः।शु॰।आर्यसा २
धुमंत्रितं।अपिचेदानीमयोध्यांप्रतिगतस्यत्रिशंकुयाजिनःक्षत्रियब्राह्मणस्यपश्चाद्वृत्तिर्विघट
यितव्या।सा॰।वत्सयुक्तमुक्तंभवता।पश्चपुनरार्यांताटकामंतरेणनान्यःशक्नोतिसाधयितुं।बलेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गसहस्रस्य धारयंती निशाचरी ।। निग्रहाग्रहे देवस्य कापि स्त्रीति मोऽस्पते ।।१७।। शुन॰ तदत्र भवता
ताटका नियुज्यतां । अहं तु देवाय वृत्तांतमिमं निवेदयिष्यामीति निष्क्रांतः ।। सा॰ पुरतो विलोक्य सवि
स्मयं । कथं स्मरणमात्रसन्निहितासेयमार्या ताटका । येषा । आश्चर्या कल्पवल्लस्पयोधर भरव्याविद्धमे
घघटास्तब्धा । स्थ्यामिषगृध्रुगृध्रुगरुदास्फालोच्छलन्मूर्छना । व्यादायाननमट्टहासविकटं दूरेण
तारापथात्रस्यत्सिद्धपुरंध्रिवृंदरभसोत्सुकादुपक्रामति ।।१८।। ततः प्रविशति यथानिर्दिष्टा ताटका ।।
सा॰ उपसृत्यार्ये ताटके प्रणमामि । ता॰ कहं सारणः । सा॰ अथ किं । ता॰ दीहाउ होहि । सा॰ क्वास्थि
ता । ता॰ कोसि अम्हे हसिणो दायादेण परसुरामेण परिचिदस्स माहेस्सरस्स महाराअस्स वअणादो
अव्वविघ्धो न कादव्वो त्ति पुत्ति अम्मरि अम्मं त्तिदु । सा॰ विहस्य । आर्ये क्षत्रियबंधागोधिस्तेरूपायत्त
ता । आर्ये यज्ञ इति व्यपदिश्य सीतारामयोरन्योन्यानुग्रहणं निर्वर्त्तयितुं जनककौशिकयोरयमारंभः । ता॰
कीरिसो च वेदसो । सा॰ महाराजस्तामर्थयिष्यतीति । ता॰ जइ एव्वं अहं एव्व महाराअं भणिमि तं जाणं ईओ
हरिस्सं । सा॰ मा मैवं । बहुलाद्य परस्तात् सीता नानुरक्ता दत्तानेने रावणश्रीतिश्च जनकेन च नानुमतं प्रभो ।
।।१९।। किंचाहरामत्वतायारं मायाः शापेन हिमवत्तटे । अनिच्छंत्या बलात्कारो न नया क्योरक्षसां प्रभोः ।२०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतु कर्ण एव मिति कथयन्ति। निशम्य ताटका सहर्षं। णिउणं तु एमं तिदं। एव्वं विदर्सकं ठस्स हद्दे सीदाप
डिस्सदि। चिप्पलम्भप्पवुज्जाणं विप्पलम्भो विजुज्जइ।१। अहं वि मझ्झे मग्गेण तं रक्खस्स करत्तसाणुअरंत
मेहसिणं मायं करिअ बाबादयिस्सं तुमं बिल्लंकाउरं गदुय महाराअं पस्थावेहि। इति निष्क्रांता ताटका।
सा०। ताटकायाः सहायार्थं जयस्पानियमादितः। मायावी मारीचः सानुगोऽन्वयिष्यते॥१॥ इति निष्क्रांताः। नत्र
मिश्रविष्कम्भः। ततः प्रविशति विद्युज्जिह्वेन सारणेन दशाननः २। डहब्याजनकात्मजेति कुतुकं धत्ते दशाविं
शतिबाहुनामपि सा तथैव रसासादा लिंगितव्योस्मि मो किं खस्मारस्त्यायन। नीरुन्धिरं रुपधिगता दशानः
कष्टं न्रपशारेपिस्वयमतो धर्तव्यमारत्तवपुः।१। अपि च। सीरध्वजे सहजमप्रकटप्परोक्षपमाहेश्वरत्रण
यपात्तनपात्रतीमे। कन्यानिमित्तमनुकर्तुमनर्हवेषंमानः कथं कथयसत्रपयोस्मितव्यः।१। सा०। महारा राम
जमानहानिरिस्यत्ममावेगेन। दिक्पालैरपि यः क्ष्णेषोदमयंतीस्वयंवरोऽनर्श्वेः किमयंपंथायेनत्वमपिया ४
स्पसि।१। विद्युज्जिह्वः सपुलकोऽद्दं स्वगतं॥ किं दिक्पालैरिव दमयंती राक्षसार्थितापि न लम्येत जानकी
प्रकार्या। रघुविंशुपरतंत्रमेदिनीकन्यकायास्वायिरत्व्दयमुपायैः शक्यते नोपनेतुं। तवत्वजनकराजेताद
ग्रोप्रमसरव्यो तत्स्यमञ्जुरमुष्पाः संग्रलपरपर्पथाः।१। दशाननः। नवत्खेवं तावत्। अनतिलंघनीयं म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावो वचनं। सारण ते देहि पुष्पकमुपनयनः प्रस्थानाय। सा०। यदाज्ञापयति देव इति निष्क्रम्य पुष्पकेण
सह प्रविश्य महाराज विमानमिदमुपनीतं। विद्यु०। एतद्धि दिग्विजये कैलासात्क्षिनवतस्त्रैलोक्यवंदीगुरु।
भ्वासोऽइदविनिन्नवर्णवल्लीपर्यंतमुक्तासरो अस्पृष्टं निजपुष्पगंधमिल्लनत्रासान्ननोदापुनामाया
मघनिगूढमंबरतलादभ्येति यानं पुरः। ९। द०। दृष्ट्वा सामर्षविद्रस्य अविमन्ये दुर्लभ उवंचोरवत्तिम
नुरः धन्नधुना स्माकं धरोयमपूर्वइति। मयि विश्रंभाद्दिवस्वयमपूर्वतामवलंबते विमानमिदं। अहूर
चिनिपर्तितग्रहविमानमधांजलिप्रणम्रस्फरमस्कृतिप्रवणद्धसिद्धविद्याधरं। अ। दसरजा। नीचरस्तानि
तमिस्त्रदिव्यांगनाकरग्रहतडिंडिमध्वनियदेवमास्ते पुरः। १। वि०। महाराज मामैवं। अभिमतरूपपरि
ग्रहवक्रीगृहीतायाः सीतायानिष्टेतेकस्त्ररणमंगलोत्सवनं दिते च जगदीश्वरस्वरलाभेन जनकराजेवि
जितनवसत्तापपरितोषितयाकन्ययासहैव प्रतिनिष्टेतेन च महाराज भविष्यति पुनस्तादृशमेव विमानमि
दं पुष्पकं। नन्दारूढ्यतां देयेन। द०। विद्युज्जिह्वेन सारणेन सह विमानारोहणं नाट्यति। सा०। पश्य महाराज।
अतः प्रापित कूर्मनक्रमकरोनांभोनिधिः स्यदत्तेधेतमंडलामेषरत्नमुकुरच्छायरुचीनांपतिः। बातमंदनव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्करीकिसल्लयस्पंदावधिर्देवूपते लंकायामुपलितेबहिः पदमपिस्वामिन्विमानेन ॥९॥ वि॰ किमिदमाश्चर्यस्था
नभत्तस्य। कैलाससैलसमुत्क्षेपव्यपोहितकंदुकक्रीडाविनोदस्य कारागृहकुटुंबीकृततज्जनद्विषः नि
रवधिकमायाधुरंधरस्य दशकंधरस्य। सविमर्ष। कैलासाद्दुर्गुणबलमपिपुष्पकमासीत्पुरस्तादिक्पा
लानामपिच पुरतो दर्शितः शास्त्रधारैः। युक्तोस्मान्निस्तदयमधुनाप्यचकुमव्यक्तरूपैर्वामायापयग्रह
ण पटिमाभैषिरूपस्याप्येवं ॥१॥ सारणखरयात्तदिदं विमानराजं। सा॰ राजन्नजानाति नवानुस्तन
वेगमत्तस्य। पन्नगापर्यवरोहलीवशिखरिस्थूलागुच्चकंनक्षोरवीन तसमुद्भवेष्टितामिधोविन्ध्यस्य
तीवास्थितिः। पाषाणद्रुमवल्लरीवल्ल्यंतौ पूर्वापराद्रिपुनर्गरेणहीनः समेरखनामिवज्रवादस्मिन्समु
ज्जृंभिते ॥९॥ वि॰ अयमकस्मादवतीर्णापववयंएको सुतनेनत्रजविनो विमानराजस्य। पच्चेलिमफलभ राम
रपरिणद्धमुग्धबकुलतरवरणतरुखंडमाडितपर्यंतमहीतलेभ्रमं नानाविधपक्षिगणाकीर्णपरिसरारण्य
पुष्पमिदमाश्रमपदं कुत्रिंबकं नंदनस्यापि दिद्वारूनीं। गिरिकंठककठोरस्थावसंघट्टनीयांन्निबिडघट ५
लनीरालीढवानीरकुंजा। वनकरिकरकेलीक्षुब्धनालीकजालामदमुदितमरालकुंजा गाहस्पतेकौन्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीयं।१।द०।सारणंप्रतिसोत्कंठं आकंठंबुनिमग्नतापसत्रिरस्कंधंचरुजटामंडलत्रासोद्भ्रांतरथां
गनाममिथुनंक्रेंकारनीरंध्रया। आकाश्यादन अधिरूपवतरतु क्षोणीमिदंपुष्पकं यत्रायाति धुनां
कुंजो जनकआनिःश्वासरम्योनिलः।।१९।।सा०। महाराज यथाभिमतं नु अवतीर्णमिदं पुष्पकं। ततो यावद
वतरामो वयमस्मादस्मिन्नेव विविक्तरमणीये कौशिकीतीरे। सर्वे विमानावरोहणं नाटयंति। या
वदस्मदागमनमिदमदृश्यमत्रैव तिष्ठतु। सा०। अतः परमस्माभिस्तिरस्कारिणीप्रभावादनालक्षि
तकै तैवराक्रांतव्या भूमिर्भागाः। यतः। नीरंध्रधनिवहः परितरलरुणां माईलत्वचर्मकुशाविष्टर
सांद्रमूलः। तस्याश्रमं कथयतीव मुनेः प्रकृष्टं नारयानिरज्वलमग्नाजिनवल्कलाभिः।१९।द०।यु
क्तमभिहितं सारणेन। वदस्माभिर्निश्चितमुपलब्धव्यं। किं वदंती।। वि०। स्वस्मृषीनिमीलयंती रस्का
रिणीविद्यामभिध्यायते। द०। पर्यंतदत्तदृष्टिः कावेतौ समित्कुशपाणीवर्णिनौ इत एवाभिवर्तेते।
सा०। भवितव्यमेताभ्यां गाधिसूनोरंतेवासिभ्यां। ततः प्रविशतो द्वौ वर्णिनौ। एकः। अहं खलु साके
तं प्रतिप्रतिष्ठमानेन कुलपतिना कौशिकनंदनेन तावदग्निपरिचरणार्थं अग्निशरणे नियुक्तोस्मि अतः
खलु कौशिकीतीरमभिकुशमाहर्तुं गच्छामीति निष्क्रामति। द्वितीयः। अहमिदानीं जनकपुरोधसा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोतमनंदनस्य महर्षेरनुज्ञया समित्कुशमाहर्तुं गता। मया वसतिरुपगंतव्या महाराजजनकस्येति परि
क्रामति। सखे सत्यव्रत कथय कियंति दिवसानि महाराजजनकः कौशिकाश्रमे निवसति।। प्रथमः।।
६ यावदस्मत्कुलगुरोर्यक्ष्यमाणस्य परिसमाप्यते एवमनथमहोत्सवः। द०।। सारण विश्वामित्रशतानं
दशिष्यावि मौ।। नंदनयोः श्रृणु मे निलीना एव विश्रब्धजल्पितानि। सा०। किं न पश्यति भवान्। म
हाराजतिरस्करणी विद्याप्रयोगं विद्युज्जिह्वस्य तत्र कुतो निलयनं। द०। सहर्षं। अहो विद्याप्रभावः। न ह
न केवलमस्मान् जनो न पश्यति न श्रृणोति च वचनानि।। वि०।। महाराजविश्रब्धमितस्ततश्चरिष्यामः।। द्वि
तीयः। सत्यव्रत कथमध्वरध्वंसिषु रजनीचरेषु मखमारप्स्यते भगवान् कुशिकनंदनः।। सत्य०।। सखे
देवव्रत न श्रृणुना वृत्तं। प्रतिनिशि दिव्यनिर्मितत्रसदशोपबर्हिर्मुखमसक्तगुणवर्णध्वनितपूर्णकर्णाध्व
नः। अमुष्य किल रुष्यतः स्वयमुपेत्य सत्या क्षितिं करेणाकरमाम्रशान्कमलभहरोधकुधश्चान ६
स्येतस्य महातपोनिधेर्गाधिसूनोः कियती पुनरियं रजनीचरा इति विभीषिका। वि०। श्रृणु वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवषर्वचनं ॥ सा० ॥ अत एव हि महाराजेन कौशिकस्य विविधमायाविहारी मारीचः प्र
तिबलीकृतः ॥ वि० ॥ उपपन्नमिदं । यतः । सहस्रौदध्नां तं सहस्रदलद्युमेघव्यतिकरं सहस्र
द्युमान्नद्भुं सहस्रदपि रजोह्विष्किलुषं ॥ अभिव्यजन्नोमस्थलमतुलं मायाबलमद्यः पुरामा
रीचोयं युधि भयमनैषीद्दिविषदः ॥ १८ ॥ सस्नेहबहुमानं । विद्युज्जिह्वं प्रति मारीचस्य भवा
नेव मायाबलमिहास्मिन् ॥ विद्युज्जिह्वः विजानाति ह्यहिरेव ह्यहेः पदान् । १९ । सरवेमहात
पो निधिरिति युक्तमाह भवान् ॥ यदेतस्य कुलपतेराश्रमपदे । शुण्डालेन सलीलमेषक
लभो वल्कान्मणान्तोज्ज्वलं भारं भविकस्वरान्मृगपते र्दंष्ट्रांकुरं कर्षति ॥ एषाव
त्स तरीच मातरि तृणान्यत्तुं गतायां क्वचिद्द्वीपिन्या वनकेसरस्थितिं जुषस्तन्यं पयः पश्य
षेति ॥ किंच । पित्र्भ्यां विक्रीतं प्रभुमिव परित्रातुं मलसंस्थमात्मानं दीनं दृश्यामव कि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंतं दिशि दिशि। शुनःशेपं यूपग्रथितमभ्युभ्यान्मोचितवनो मुनेरस्य ज्ञातुं भवति महिमानं ज
गति कः॥१॥ वि०॥ न जानाति विप्रवटुर्मारीचस्य मायाबलं॥ तत एवमाह। सा०। भवतु को
दोषः सर्वेपि स्वजनं प्रशंसंति। वि०। अस्त्वेवं। न पुनरेवं मारीचे। पश्य। अत्रैतो गारमलक्षितः
प्रविशन्ति व्यापादयन्त्यस्यर्त्विजा॥ स्रुक्भांडानि भिनत्ति रब्राद्रति प्रभ्रन्नाण्हात्य शेषं हविः।
भीमभ्रूकुटि दर्शयन्मुखमृषिस्त्रीणां विधत्ते भयं मारीचोयमशक्यशासन इति ज्ञातं न
केषामिदं॥१॥ स०। अत एव निःशंकमारभ्यमाणमखः प्रियसखमिक्ष्वाकुनाथं दश
रथमुपनेतुमयोध्यां प्रतिगतः कुलपतिः। सा०- सामर्षविस्मितं। जामदग्न्यमुखादे
वस्तवनायान्वयायितनः। सर्वं नद्विस्मृतं हंत लक्ष्यते निर्भयो मुनिः॥१॥ वि०। सारणकि
वान्चटोर्मृढस्य वचस्यमर्षः। गुह्यमंत्रः। खलु कौशिकनंदनः। सा०। किमनेन गोपने

न। कुशिकनंदनस्य। यद्भार्गवमुखेन देवं प्रति प्रार्थनां शिष्योपि स्वस्य न जानाति। वि०। जनकस्य
स्यस्मिन्नभीष्टघटनक्षम इति विश्रंभाय। यदुक्तं भवता जनकस्त्वमृषिं वरोपसंग्रहणे प्रतिभ
रुनवानिति। सा०। विहस्य बलवानिति तेन ज्ञात्मेन जनकेन प्रतिभट्टरुनो गाधिसूनुः। पश्ये
ति भगवानप्रियस्य विक्रमविजृंभितं। निर्वाप्य ध्वजिनीं निहत्य तुरगो त्रिभिर्यच स्यंदनं द्वै
धाकृत्य च कार्मुकं रणभुवो दूरेण विद्रावितः। वासिष्ठ्यापाजनि तेन गर्भवा खलु त्वाकल्मे द्या
दिभिः सेनिकैः। दीनो पः प्रययौ पुरा तपसि तुं। दं०। सोयं बली कौशिकः ॥१॥ देव०। श्रूयते तस्य
राजर्षेर्ब्रह्मचर्यव्रते स्थितात्। ऋष्यशृंगचरीर्भार्याश्चत्वारस्तनयाइति ॥१॥ सत्य०। तेषामपि
महातेजा रामो रतिकरः पितुः। स्वयंभूरिव भूतानां श्रूयते गुणवत्तरः ॥१॥ दं०। साम्प्रतं यं॥
किमाह विप्रवटुः ॥ वि०। महाराज जनकश्के निस्तो दृशी। सा०। अतएव जानका अस्मिन्प्रेमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिनिवेशः॥वि॰।अतएवचमहाराजेनजिघृक्षितंजानकीपरिणयायनाद्रूप्यं॥दे॰।सशिरःकंपं
८ जानामिमहाराजजनकस्यपरिसरेरामइतिनामानुगुणभसावाम्रेडितगुणग्रामोगुरूणा
गोत्नमनंदनेन।तथाहि।वीरोविश्वजनप्रियःशमधनःशौर्येप्यतुलैकवान्सात्रधर्ममनु
त्रभूरिफलदंसंभावयन्नात्मनः॥धर्मज्ञःशुचिरुज्झितानृतकथोदीनानुकंपीबहुधीभा
नन्नविशारदोविजयतेरामोजगन्नायकः॥१॥द॰॥सरोमांचंस्वगतं।किमेतद्घूर्णनंपरमार्थः
तःस्यात्।प्रकाशं।यत्किंचित्प्रलपितंजनकसंनिधौराजर्षिणोपजीविनोगोतमादुरपत्यस्य
विप्रबटुरन्तुवदति।वि॰।ससंरंभं॥सारणपश्य।स्वश्यामातुरूपेत्यनक्रमकरोद्यःशीलभंगंशा
ठ्रोद्दूरतःसचिरायपेनमघवाकाराकुटुंबीकृतः।एतस्मिन्नुपकुर्वतिप्रथमतःस्तुत्येपितृ ८
केभ्यरेरामंमैथिलसन्निधोबनकिमिलसत्तोदहत्यास्फतः॥१॥स॰।अतएवगुणनिधावस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽनुरागो जा[illegible]न क्याः । द॰ । रामानुरक्तासीतेति वचो मर्मभिदे कतः । अन्यत्र स्मरनाराचाः श्रू
णवतस्तद्गुणान्मम ॥ १ ॥ वि॰ । सकोपनिःश्वासं । अहह त्वातनय एव घातयितव्यः प्रथमं ताटकेयेन
पश्चादन्ये । स्तोनास्तुव तु निःशंकं पंकेचिद्रोतमा स्तजः । शृण्वतात्वामिनः सख्याजनकेन क
थंस्थितं ॥ १ ॥ दे॰ । एवमेव ननु । परं तु रामप्रशंसापरमस्मद्दुहुं प्रतिवदसे वं महाराजः ॥ स॰ । कथमि
व । अन्येसार रमाकर्णयंति । दे॰ । अस्करामात्स्ककावत्साप्रशंसतु चरतं भवान् । अर्केंदुकुलसंबं
धो युक्तोप्यवतु दुर्घटश्च ति ॥ १ ॥ वि॰ । साधुजनकसाधु । सम्यग्दृष्टं भवता । दे॰ । अभिज्ञः खल्वयं ॥
सा॰ । कथमेषस्तं घटनं कन्याभिलाषिण्यपि महाराजे । दे॰ । शेषमपि महाराज वचनं शृणोतु ॥
यत्किल । कांक्षत्यर्थयितुं स्नेहात्कन्यारत्नमिदं मम ॥ केकसीसूनुरित्येव कर्णाकर्णिकया श्रु
तं ॥ तनश्च कन्यामर्थयते यदि त्रिभुवनप्रोज्जृंभदोर्विक्रमो नसाविश्वसृजः स्तरवाममदशास्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः सखे शौवाग्रणीः । नामस्मै रघुनंदने कहृदयांद्यतुं कथं शाकुयांस्यां मेत्ति कथं वदेयमिति
९ च क्लिश्ये धुना केवलं ॥१॥ विद्युयुक्तमुपन्यस्तं जनकेन शानानंदाय । द० । सबाष्पगद्गदं । सखेसी
रध्वे जमास्कन्ने कूशाः । किं नैवै वकुशाय भवेयं । सा० । नहि भवान्निजरूपेण कन्यांयाचने अ
पितु रघुकुमारवेषेण नोपरि निनीषति । सख० । विहस्य किमिदमुक्तं जनकमहाराजेन । शृ
णु तावत् । कपिप्रवरकक्षगोदुरपकर्षदो विंशतिः शिरोदशाकमग्नतः पदचतुष्टयं चान्यतः
अभीक्ष्णमधुनीतयः स्वतनुमोचनार्थं पुरः कथंतदशाकंधरो भुवनभीमदोर्विक्रमः । द० । स
रोषं । दुरात्मनोस्य विप्रवटोः कंटमवरुंजेयमिति उत्थाय द्वाभ्यां निवारितस्तिष्ठति । वि० । धि
ङ्मूर्खो नैनं जानाति । निष्पर्यायनिवेशितांगुलिशानभक्ष्णपर्यंतभ्रूवंधोदंचितशंकरा १
चलेधुरादीव्यद्भुजाविंशनेः । अस्यत्वस्य दुमारुचयं दृढनपरिघं गप्रहृष्यन्नमुपक्रांतस्कति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षिराक्षसपतेरास्तेगुणानांकुलं।१।दे०।सविनयंविद्युज्जिह्व मामेवं। केयंस्तुत्यस्य भग
वतःस्तावकिन।नाम।कथयामिनावत्। पुराकिलघोरेतपसिवर्त्तमानस्य।करकमलतले
नशैलकन्याकुचतटसंततकुंकुमारुणेन।सकरुणमम्ब्रान्ममापरांगत्वमसिद्धशालप
सेतिचंद्रमौलिः।१।दे०।सत्यव्रतकिमुच्यतेकश्चित्कस्यचित्प्रतापस्खलनंनदोषाय।दे०॥
सामर्षंविहस्यकथनाममप्रतापस्खलनं।वालीनामकपिःसकश्चनमयायोद्धुंबलीतिभ्रमा
दाहूतोममबाहुसारमविदन्कक्षेसमाममग्रहीत्।मुष्ट्याघातविघूर्णितस्तदनुमामुन्मुच्य
सख्यंव्यधान्नोवेद्मिस्खलितप्रतापइतितत्कोयंकलंकोमम॥१॥सा०।मन्दाःप्रहृतनयो
लंकेश्वरस्यप्रतापंनजानंति।क्षिपतिगगनेकैलासंयोजनवाद्ध्राभिःकोरैर्दशभिरितैरेस्त
भ्रमयंतंप्रतीच्छतिलीलया।भुवनजयिनोरक्षोनेतुःकिमस्यपुरःक्षमःपरिगणयितुंवाली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामप्लवंगकुलाधमः ॥१॥ स० देवत्वं ततवालमिदानीं लंकेश्वरस्य कलंकसंवरणेन । रेवायांरव
१० लुपंचभिर्भुजशौर्ते स्थ्याप्रवाहंबलान्न्यैरंबरवेणिकर्षणयोपतिक्षेपकेलीपरैः । स्वच्छंदंव
निताजनंरमयतामागर्जुनोनागतोमध्येपुटुमनेन किंदशमुखोनीतोनकारागृहे ॥१॥ द० ॥
अहोदुरात्मा त्रिशंकुयाजिनोमुनिपाशस्यशिष्यस्तदनुरूपंप्रलपति । तदयंभक्षयितव्यो
राक्षसानां । दे० । ननिष्ठुतुरश्रूपतामिदं । यस्मिन्निस्मिन्देवदानवकुलश्रक्रांतसंदर्शनक्षिप्तो
न्मोचितघोरनारकगनप्राणिप्रणीनस्तवैः । मुंचत्युद्भटमट्टहाससमभितोविद्रोविनाल्का
सरात्सभ्रष्टंजहस्कंयमंनिशिचरावर्ण्योनकिंरावणः ॥१॥ वि० । साधुदेवत्रतंसाधु । नंदनीयोसि १०
वचनेन । सा० । नकेवलमयंअपितुयस्यायंशिष्यः । द० । मन्येजनकसंबंधीयः कश्चिदपिमे
प्रियः । चंपकस्यानुषंगेणसंपुटोप्यधिवास्यते ॥१॥ स० । किमनेनावयोर्वृथावाक्कलहेनाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रामति समयः गुरुकुलमेव गच्छावः। इति निष्क्रान्तौ। द०। वयमपि कौशिकीतीरपरिसरारण्य
भूषणेनानेन सहकारवनेन प्रच्छन्नास्तत्र तत्र प्रवृत्तिमुपलभ्यमाना जानकीजन्मसूचि
तसकलतभाजंजनकराजंउपसर्पामः। इतरौ। यथा रोचते महाराजायेति निष्क्रान्ताः सर्वे।
प्रथमोंकः॥१॥ ततः प्रविशति अत्रिरनुसूया च॥ अत्रिः। अनुसूये आहूतोहं यक्ष्यमाणेन म
हर्षिणा कौशिकनंदनेन। संप्राप्तश्च भवत्यास्सहैव तदीयमाश्रमपदं। किंतु जनकेन स
मेमि हागता यावत्सायाः किमुपहरिष्यावः सीतायाः। अनु। नन्वस्ति खलु मम वशो देवै
र्दत्तं दिव्यं चीनांशुकमंगरागश्च। ययोः किल धारणे यक्षराक्षसादैत्यैरजितोपि कुल
पालिकाजनो न लभते कामं येन मुंचनेचनेलसर्गिकं शीलं च॥ अत्रिः। उपपन्नमेतत्।
श्रृणुमः किल जानकीं दशाननः प्रार्थयितुं उद्युक्त इति। पुरतोवलोक्य। केयं करा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यामुपनयन्ति सरसानि कमलिनीदलानि मृणालानि च। अनु०। भवितव्यमनयास्व
चरितया नाम सख्या विदेहकन्यायाः। अतो मन्ये मदनानलेन वा प्रोद्दातपलंघनेन वा
११ बलवदस्वस्था जानकीति। अत्रिः। स्मृतिमभिनीयमदनानिलेनैव। यतः। दृष्टं हि मयास
माधिस्थितेन।। जनकनृपतिकन्या जातुनिद्रां भजन्ती स्मरमिव हृचिरांगं वीरमालोकयरा
मं।। अरतिरविकलहृल्ये चेतसा तन्द्रुते न श्रयति सहचारीभिः पालिता पुष्पशय्यां।।१।। भवतु
जनकसमीपमेव तावद्गच्छाव इति निष्क्रान्तौ।। शुद्धविष्कंभः।। ततः प्रविशति विद्युज्जि
ह्वेन सारणेन सह दशाननः।। रा०। यद्वीयं सौंदर्यं जनयति रतेरप्यवमतिं यया चाविर्भूतं ज
नकनृपतेर्वैवयजनात्।। मम द्रष्टुं शंका युवतिरियमद्येति मनसः परीणामः कोपि स्फु ११
रति ननु हर्षाद्भुतमयः।।१।। तदिह सारण कथय कतमेन यथा कौशिकाश्रमवाटमुपग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्राव्यः॥ सा०॥ नन्वनेन दक्षिणतो विकंकटाटवेरुत्तरतः किंशुकारण्यस्य॥ वि०॥ महाराज इत इतो
भवान्॥ सर्वे परिक्रामंति॥ द०॥ सारण किमस्ति कौशिकीतीरेपि नंदनवनं॥ सा०॥ नहि २ रसाला
नामंतर्मंदकलरणत्कोकिलकुलं समंतादुन्मीलद्बकुलमुकुलामोदभरितं॥ घनस्निग्धच्छा
यं क्रमुककदलीशीतलनलिननुपी निर्धूतं नवमिदम्रमेरोश्रमपदं॥१॥ वि०॥ अहो रामणीय
कम्रमेराश्रमस्य॥ इह हि॥ पक्कानि प्रच्यवंते क्रमुकविटपिनामुच्छ्रितानां फलानि स्पंदंते रा
जरंभाः फलभरनमिता वातिमंदानिलेपि॥ सद्यश्च्यंते विपाकच्युतमधुरफलव्यासमूलालवाला
लाभारेणामीफलानां युवतिकुचभरस्फर्द्धिनो नारिकेलाः॥१॥ नेपथ्ये जाव चिन्तले हे त्ति मि
त्तं पिअसही शीलवदी चिन्तसंभारं आणेदुं गदा॥ रूञ्ञ रिदा विसिमिरो व ञ्ञारणिमितं ण
लिनीपत्ता इं नदो आरभिअ अदिञ्ञणत्तिकरिअ बलञ्ञ खुमं मा होइ बाहेहि॥ कागई॥ द०॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्ण्य। निनदः पिकाङ्गनायाः कलितमाकंदकंदलकषायः॥ आकर्ण्य तेरतिपतेः दृत इव भोगा
१२ वतीपाठः॥१॥ सा०॥ महाराज नायमभिव्यक्तरमणीयः पिकशब्दः अपि तु मन्ये सारिका व्या
हरतीति। पुनर्नेपथ्ये। भम्मअवं कुसुमाहेउ एक्कवारं वि आलेहलिहिदं पि अजणं दठ्ठुण न
रोमए तु हक्कि देपाणा विसज्जियंते॥ तारवण मे तं मरिसेहि॥ इ०॥ आकर्ण्य॥ काचिदियम
विसोढ प्रियतमविरहपरवशा विलपन्ती तपस्विनी॥ तत्सरितोपि इव्य यतां केयमिति॥ नवि
शिष्यनेयदुक्तिमंदकलपिकसारिकानिनदात्। रूपेण च भवितव्यं तस्यास्त्रैलोक्यरुचि
रेण॥१॥ सा०। यदाज्ञापयति देव इति निष्क्रम्य पुनः प्रविश्य। सविस्मयं महाराज नका १२
पि किंचिदस्ति॥ येनेदं व्याहृतं। दे०। साश्चर्यमुत्पत्यमुत्थाय विलोक्य हंत न किंचिदत्र कथ
मेतत्॥ वि०। महदिदमाश्चर्यस्थानं। पुनर्नेपथ्ये। णिक्करुणो मअणो मसाणुण अपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दो विबाधेई।सा०।अहोपुनर्निरालंबवाणी॥दु०।हंत कथमंन भास्कथा द्दष्टिः।विं०।अचिंत्य
महिमाहिमाद्दिन पस्त्रिनामाश्रमव्या पारः॥ पुनर्नेपथ्ये सरणं अज्जविसंवा सर्वे आकर्ण्यनि
श्चिंते यमस्मादशामहस्याकाचिदुत्कंठिना विलपति॥ प्रविश्यपटाक्षेपेण मृणालनलिनी
पत्रहस्ताप्रियंवदा।२।हलामा एवं २ असोहुणं भणनतः प्रविशतिकिसलयशयनोप
विष्टामायासीना।२पि अजणमुखचंददंसणस्स हंवा।१।इतिमूर्छति।स्र०।हलासम
स्ससिहि २ इतिनलिनीदलेनवीजयति।दु०।सानूनंनलिनेक्षणाप्रियजनंव्याहृत्य मोह
गता येनोक्तीनलिनीदलेन सहसानाबीजं यंत्यंतिके।एनां इहुमनंगतापविधुरां भा
ग्यं नमेवर्त्तते यद्वा किंव्यसनेनवज्रमणिरप्यस्याः स्फुटेदीक्षणे॥१॥सा०।मानदृश्यते
सहचरितुदृश्यते इतिमहदिदमाश्चर्यं॥वि०।तदपिक्रमेण ज्ञास्यामः।स्र०।न्हुडि २ अदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भमिंगदो सेसंदावो नादाणं चंदनपल्लव रसेहिं सिंचेमि णम्मिति कराभ्यां चंदनपल्लवानि निष्पी
१२ उति। ट॰। चंदनपल्लवनिकरः सख्याः करयंत्रपीडितो नन्नं। वपुषो मृगशाबाक्ष्यामार्द्रवम
पहृतमनेनेति।१। स॰। निषिंच्यएदेस्स हृअंदिदे चंदणरसे निसेहासीना। कथं चित्तसमाध्या
स्यकेति अंकालंएवं सहिणं आआसआरिएणिहोदि॥ स॰। हला दाणिं तुह वल्लहो आआ
मिदिणे आआमिस्सन्दितिस्स णिआहि॥ सा॰। कः पुनरस्या वल्लभः। द॰। यः क्रतुपुण्यः सी।
अज्जरवुजीवंतिएमए आआमिदिणं पेरखणिज्जं। द॰। येनायमुत्सताक्ष्याः क्षणमप्यवि
षह्यवेदनामदनः। स तु धन्योपि न धन्याय देवमस्यामुदासीनः।१ स॰ हला माएव २ आले
हलिहिदं वल्लहं दट्ठूण एदं एक्कदिणं अदिवाहिदुं। नन॰। भवि शाति चित्रसंभारहस्ता शी १२
लवती।२ हला एदं चित्तफलअं इमे चित्तसंभारा इत्यर्पयति। स॰। कहं विधीरत्तेणंग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णिहं अ आलिहदु पिअसही। सी०। नाथेन चित्रफलकं गृहीत्वा गात्रस्तंभेनाट्यन्ति॥ स्त०। हला
किंचितेसि। शीलं। स्त०। अरि रे किं पुच्छिदव्वं सो महाणुहावो से सिविणए दंसिदो मअणेण॥
सा०। महाराज दिष्ट्या वर्धसे॥ त्वामन्तरेण भुवनेषु कोऽन्यो महानुभावः॥ द०। अस्ति मे कौ
तूहलं। उपर्यपि पश्यामः। सीता। मुत्त॥ मुणाल लज्जागुरुई गंहीदं धीरत्तणं पआसेण। जउ
देल्ल हे हिदीणं पुप्फरवण मत्तदोणण॥१॥ इति कथं चिल्लिरवन्ति॥ द०। यथारे रवान्यासो
विमलमधुरश्चित्रफलके दृश्यो। प्रत्यासंगाद्विकलगृहीतः प्रतिमद्र। नदांकूर्णयत्या स्यः कु
मलदृशामेनां प्रियतमं लि। रवंती मालिरव्ये कथयति मदुःखं कणरवैः॥१॥ सी०। हला स्त
अरि रे दुट्ठहाजणले हणप्पआसेण किं पओजणं ति करि अ दृज्ज इमेहि अस्सेहि। उस्स
अणि मुंचति। द०। नन्नु मियं दोदिति। यतः। यस्तु दिक्षु तलोचनां जनो विगलत्यानकोपा

26

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लकुंकुमः॥ अरविंदपरागरूषितभ्रमरश्रीरयमभ्रुसीकरः॥१। स्न॰ हलाअलंरोअणेण।स्न
१४ लहोएवसोजणेणा।सी॰।मुखमुन्नम्यपुनर्लिखति।ग्री॰।अपवार्यहलास्नमरिदेपिअस
हीएबलवंतोएघ्वनस्सिजणो अहिणिवेसोजंपुलइदकेवालमंडलंस्नमरिअरूपकंपिदं
गुलिपल्लवंलिहिअरहरिससंफुल्ललोपणेहिंणिझ्झापइ।स्न॰।हलाजहसिविणएदिठ्ठो
तहलिहिदवेत्तिसेअहिलासो।द॰।आकर्ण्यस्वगतं।हृदयकिमस्यानेचपलमसि।पश्यपु
रस्तादपि।सी॰।पिलिरव्यचित्रंदृष्ट्वास्वगतं।कंदट्ठसामलंगोकणंतविंठ्ठरत्तणअणंतो
।अग्निदीहपीवरभुओकहंविसोएघ्वतारिसोलिहिदो।१।सहर्षसंस्कृतमाश्रित्य।ददृ
मिदानीं।पाणौकार्मुकमोकलेयमिषुधीपाश्चात्ययोरंसयोर्भस्मस्तोककुरःस्थले १४
करितटेमौवीमयीमेखलां।किंवाहंवरनारविंदमधुपभ्रेणमिमनोहारिणीमस्यास्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमश्कपरं परामभिनवां कुर्यां कपोलस्थले ॥१॥ इति पुनर्लिखति। र·। चित्रं दृष्ट्वा निःश्व
स्य स्वगतं कथमिदमन्यथावर्तते। हृदय वृथा ते मनोरथः। सी·। विलिख्य चित्रगतं ना
यकं प्रति अंजलिं बध्वा संस्कृतमाश्रित्य अयि कांत संप्रति हि। मयि मलयसमीरो वर्ष
तीव स्फुलिंगान हह हिमकरो मामग्निनासिंचतीव। किमिति मकरकेतोः किंनु वक्ष्ये
कठोर कथमपि नृदहं ते नाथनोपेक्षणीया ॥१॥ अपि च। मानदइस्स धीके स्वगतं आ
लेरखगअं पि अजणं परमद्धो त्ति गिण्हिअ मए विसुद्धाए उवाअङ्गूापवुत्तं ॥ इति
संवरणं नाटयति ॥ श्री· ॥ विहस्य हला सावसेसं वि अतुह वअणं सी·। सलज्जा णं किंपि अ
वसिस्स इलिहिदो एहुसो जणो ॥ सख्यो चित्रं दृष्ट्वा अन्योन्यप्रति सहि जह चिंतगं अस्स
आकिदीन हमणे इइहो पि असहिए अहिणिवेसो अत्थि। सा·। साश्चर्यं चित्रं दृष्ट्वा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्सम्यल्लक्षणंमुखमिमौवाहुयुगव्यायतावक्षाभोगमिदंभुजांतरमयंमध्यःप्रकामं
१५ तनुः॥सांम्राज्योचितचिन्हमुद्रितयिदंद्वंपुनःपादयोः कोनामैषजगत्त्रयेपिनपुनर्दृष्टः
पुमानीदृशः॥१॥दः॥त्वः॥नवकुवलयदलश्याममममस्यदमंगंघटयतुमलमक्ष्णोः॥विद्विषोपि
प्रकृतिरियमुदारासाधुभिःश्लाघनीयाकथयतिचमहत्त्वंदुर्लभंयत्स्वरेण॥१॥प्रकाशं
विद्युज्जिह्वपश्यचित्रलिखितं॥वः॥दृश्यतएव॥यंकिल॥महात्मानंभ्रूनेयुगुलमरु
णांतंनयनयोरुरोभस्मस्तोकच्छुरितमपिवर्णइतिवदन्ति॥युवानंव्याचष्टेविरलमधु
रस्मश्रुवदनंकरःकोदंडांकःकथयतिचराजन्यइतिनः॥१॥शील॥स्नत्त्वरिदेपेरखदु
होदी॥इतिचित्रंदर्शयति॥स्कः॥विहस्यहलामएषरखनीएकीपयोजणेजइसोपि १५
अजणोएयंपेरखइतदोतुहकरकमलस्सपारितोसित्तरेअणकउअंओमुंचेइ।

29

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दः।सत्यमाह स-चरित।यतः।नरेखासांकर्यंरक्षतिनच वर्णयति करोनिवेशैरंगानामपिससन
भावोनविष्टतः।किमरन्यच्चैतन्यंजनितमिवचित्रभुचितयानरस्यावैदग्ध्यंजयतिज
गदानंदयतिच॥१॥शी।स्फ अरिदेतुमं भणइमिपि।असहिएकरक्षोसलोउप्पेरिवयतः।पु
ढमं एव्वसेहछ्छे कउअजुअलं आमोचि अंजंताद्दकोसिएणररखसंधनंरणमणिघडितं
जाणइएहउ्ठे आमुंचेहिंति तु हहद्दे समप्पिरआसी।जस्सिंररखसंधंकरणोणाममणि॥
दशाननः सारणश्च श्रुत्वापरस्परं मुखमवलोकयतः।वि।विहस्य श्रुतं चश्रोतव्यं विदि
तं च वेदितव्यं।इयं च सीता अयं च रामः।यास्माभिर्नदृष्टा यश्चैनयालिरिवतुः।द।किमय
मेव वैदेहीपणयावनारदुर्ललितोरामहतकः॥सामर्षं॥चित्रप्रति।मागर्वं वहरघुवंश
पांसन त्वं वैदेहीप्रणयपदं वपुर्ममेति।मारीचस्तत्र वनिधायनायमस्मयुक्तस्त्वद्धानाद्दिरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिकिंनु नावनैव ॥१॥ सा॰। महाराज पश्यतु भवान विनयं कौशिकस्य। यदेवमस्येराक्ष
साधिकरण मणिघटितकटकयुगलमर्पितमासीत्॥ नूनमनेन दृष्टमात्रामनेनाप
१६ हरिष्यतीति भवानिति तर्कितं भवेत्॥ वि॰। एवमेवैनत्॥ अभिज्ञः खल्वयं क्षत्रिय ब्राह्म
णः। द॰। आकाशे लक्ष्यं बध्वा सक्रोधसंहा। अरे रे क्षत्रियापसद। स्पष्टं ध्याच तुरोसिनाभि
भवितुं मारीचमायो धनेरं भोस्त्वं भयितुं क्षमोसि न पुनर्जेतुं रणे तोटकं। शान्तस्त्वात्तुम
पित्रि ज्ञो कुमत्लसंबध्यं नमे राघवं तन्मन्ये मयि विप्रियाचरण तो मंतुं पुनश्चेष्टसे ॥१॥ सा॰
किमुच्यते मंतुं पुनश्चेष्टस इति मन्त्र एवायं। द॰। सोत्कंठं॥ नत्तिष्ठतु जानकी द्रष्टुमुपाय
श्चिंत्यतां। सा॰। दृष्ट एव। द॰। सोत्साहं। कथमिव। सा॰। कर्णे एवमेवमिति कथयति। द॰। १६
विहस्य निपुणमुपक्रांतं भवता। भवितव्यं भावनायोध्यकमुनिवेषेण कटकग्रहणा

31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या।सा॰।तथेत्युत्थाय मुनिवेषेण प्रविशति॥आयोध्यको हमध्वपरिश्रांत्या विक्लवोस्मि संभा
वयमामेकच्छायादानेन व्यजनपवनदानेन वा॥मूर्छां नाटयति॥वि॰।देवपरस्य सारणस्य
कौशलं।बद्धभ्रूलयः पिंगलजटः स्वेदकणक्लिन्नभस्मपुंड्रमुखः॥निःश्वसति दंडपाणिः व्याकु
लहृदयमाजिनोयमृषिः॥सी॰।ससंभ्रमं आयोध्ययो तिस्कणि आदितास्क अरि दे संभावेहि
ब्रह्मणं॥स्क॰।उपसृत्य ब्रह्मणादित्सम पदा इति नलिनीदलेन वीजयति॥मुनिश्चक्षुषी उ
न्मील्य उ।ज्जीवितोस्म्यहं।अकारणवत्सलया भवत्या।स्क।स्वगतं।दिट्ठिआ लद्धो सज्जो ब्रह्म
णो।प्रका॰।कोभयं कुदो आ अमिस्सदि।मु॰।अस्ति खलु दशरथस्य राजर्षेः प्रथमसूनुः।
सी॰।ससंभ्रमं।किं तस्स।द॰।साभ्यसूयं नाटकया मारीचेन च निपातितः।स्क॰।ब्रह्मणे उ
वरिकेहेहि।मु॰।शुष्यति मे जिह्वा।द॰।विहस्य कीनदीर्यं नेविपक्षकथनेन।सी।सावेगं।एसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्पिअअवं तु कामो दिस्सइ। इति विषादं नाटयति। शी॰। हला बस्सण स्स जलपाणं णि वेदेहि। सुणु
मोसे संविद। अणं। स्त॰। णलिणी पत्रपुटेन नदीजलमाहृत्य ददाति। मु॰। न पिबा मिस्त्रीजनदत्त
१८ मुदकं। सी॰। सा सच्चं स जलपाण विमुदो विसणो अस्सणो ता दुक्ख हं पियणे जस्स जीविअं तितक्के
मि॰। मु॰। स्त्र॰। न केवलं तस्य किंतु कौशिकस्यापि। तदभिमानिनः। प्र॰। अलमावेगेन। सत्यं न पिबा
मिस्त्रीजनदत्तमुदकं स्वनग्रहणेन। स्त॰। भअवं उवरि कहेहि। सी॰। दाणं ररखुमे हिअ अंजलणस्स
वा अंतरे चिट्ठइ। मु॰। नूनमिदानीमीदृशास्य मम दर्शनेन न पितरो प्रियपुत्राशोचिष्यतः। वि॰। सो
पहासं। न केवलं नो किंतु विरुद्धवेपग्रहणेन सर्वापि राक्षसजातिः। सी॰। किमिमिणाव अणेन
समाउलस्स मे हिअअस्स। शी॰। सच्चं रररवसो एसो। जो एवं अप्पिअं करिअ उवरिण कहेहि १७
मु॰। समयं। स्त॰। कथं विस्तानोऽहमनया। विमृश्य नैनन संभाव्यते। प्र॰। तस्याहं प्रियसखो रामभे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रस्य। दः। विहस्य कः संदेहः। येन तं घातयितुं प्रथममारब्धं। सी। इदं विणालमायासस्स वज्झण कदेहि
किं एदं आस्रमणे पत्थोअणं। मु। सर्वं कथयिष्यामि वः। न खलु दशग्रीवपक्षपातिन्यो यूयं। सी।
सच्चं एसो पिअजणस्स अभ्भंतर नरराजो एव्वं भणादि। शी। हला त्स्सअ रिदेद सग्गीवो णाम कीए
सो। दः। सरोषं। धिङ्मूर्खे त्रैलोक्यविजयिनं न जानासि। मु। हे राज्ञे रुद्धुर्ता हरिहयकिरीटार्चितप
दो कठोरस्कंधाग्रप्रकटहरिचक्रव्रणकिणः। प्रपौत्रोऽयं साक्षात्त्रिभुवनविधातुर्भगवतो
दशग्रीवो यं वः कथमनवतीर्णः श्रुतिपथं।१। सी। सामर्षं। किं इमिणा सगुणरहणेन। जस्सिं
ररक्खसो गित्तो अस्स महत्तो उवक्कोसो। दः। समुरवर्भंगं विद्युजिह्वः श्रुतं च श्रोतव्यं विदितं च
वेदितव्यं। वि। अत एवैतस्या वशीकरणे तस्य रामभद्रस्य रूपग्रहणं विना न पश्यामस्युपायांत
रं। दः। अशक्यमिदं वो रावणस्य। पश्यत्युक्तं किं वरवर्णिनां वरयितुं यानानुरक्तास्त्वपं तस्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संवरणीयहं तन्न यत्रो: किंधर्तुं मर्हन्तु पु:। आबाल्यादपियः सरवाकिमुचितस्तं द्विमतं भोथवा
१८ किंबाविनिपात्यमानयशासिकामोनुरोद्धुं क्षमः॥१॥ वि०। महाराज किम कांडे विक्लवोसि यदस्ति
वंचनानाम न दस्ति कुलजीवितं। यदालंब्य गृहीतेयं क्रमेण वरामेष्यन्ति॥१॥ सू०। हलाशी
लवदि किण जाणासि सोलं केस्करो जो महप्पभावं नादजणओ। पिअसही तिपसंसंतो चि
ठ्ठइ। द०। अतएव स्नेहात्त्वा वक्तुं दत्तेमया जानकी। शी० वह्मणदसग्गी वोस्कमरिदोसो अ
लेण। एदस्स परखवादिणी अारखसीओ किंदु एसा जाणई अहं एदाए दाए सहिओ
मु०। हं न जानकीति सम्यक् अवनितलं निर्दिशति॥ स०। भअवं दाणिं भण विस्सद्धं। शी० १८
ब्रह्मणजदि कुसलं भणिस्ससि तदो जाणइ तुहडुक्कुउअंपारितोसिअं दाइस्सदि। मु०।
स्य। यदर्थो यमारंभ:। प्र०। किमन्यत्कणितव्यं। सी०। सावेगं। किं उपरिहो मस्स्तमलो च्य

35

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्स अलंकारो इत्ति मूर्च्छां नाटयन्ति॥ सख्यौ॥ हा जाणइ हा सहिजणवत्सले हा भूलो॥ अमं
अलद्दी विए एत्तिअं कालं अणुवुट्टमाणं सही जणं उज्झिअ णिक्करुणाए तुए अइ इपरि
चिदस्स मणोरह वल्लहस्स तस्स एव्व अणुप्पआणं व वसिदं इत्ति रुदितं नाटयतः॥ मु॰
कथमस्थाने महानार्तनंकः॥ श्रोतव्यं मेव च॥ सख्यौ॥ हला समस्सस हि इस्सणु समासं
विव अणं॥ सी॰॥ समाश्चस्य मुनिं पश्यन्ति॥ मु॰॥ स्मर एव रामम् मूर्तिः कौशिकवपुषावदी
प पुण्येन॥ आनेष्यते दिने स्मिन्महर्षि न व्यकुत्तः श्लोकः॥१॥ द॰॥ विहस्य अयि सारणमुनि
र्भवन्नपि कथमन्नृतं वदसि दशग्रीवो विद्युज्जिह्वेनेति पठितव्यं॥ सख्यौ॥ दिट्ठिआ
वड्ढसे॥ सी॰॥ सहर्षसंभ्रममुत्थाय सारणहस्तयोः पारितोषिकं कटकद्वयं ददाति॥ द॰॥
सविस्मयं॥ विद्युद्भिः प्रकटितकुंकुमप्रभाभिः किं विषकूपवितनमभ्रे निर्व्यपेसं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्टसद्रुनकृनकद्वैवे रिदानीं लिप्यंनेयद्वनिरंबरं दिशश्च ।१। हंनकथमेतनन् । प्रभापटल
१९ मीलितामपि कथंचिदुन्मीलयन्नयाबदहमर्पयेनननइ नोपिदृग्विशांतिं ।। तडिद्भिरिवनिर्मिं
तामम नहितावरयेवधर नन्पस्कुलभाद्रु तिर्जगतिकाचिदालक्ष्यते ।१। नेपथ्ये । अये क्षितुं
कोऽपि कथयंतं अनुसूयया सहितो महर्षिरत्रिरागतः । ततः दृष्टलाव्योजनकः कुमारीमा
मंत्रयति अस्याभिवंदनाय । शी० । दिट्ठि आपिअसहीए उत्तरोत्तरं पिअं दिस्सइ चिरआ
लपुरंध्धीआ पुणदंसणा खु भअवदी अणुसूया ।। सी० । सविस्मयं अयिमे कोदूहलं । ताग
छ ससइति सर्वा निष्क्रांताः । द० । हा कथमक्षिपथमतिक्रांते वसुंधरी ।। दृष्टं नाननमिंदुबिंब
मधुरं न दृष्टो न पीनस्तनो नस्याः किं कथयामि पक्ष्मजदृशो दृष्टं न कांची पदं ।। एषा खड्ग १९
लतेव पुष्पधनुषो दृष्टापरावेणिका न त्वंगान रदर्शनाय विदधे साद्यं सदग्धो विधिः ।।१।।

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि०। किं न दृष्टः सारणाय कटके प्रसाय प्रतिनिवृत्तोऽस्याः करपल्लवः। द०। दिष्ट्या खल्वयमत्र भवता
प्रतिबोधितोस्मि भुकतुं उकुटिलपाटलकरजकनकांगुलीयकमनीयः। स्फुटितकमलोदर
श्रीः स्मरामि न स्याः करो दृष्टः॥१॥ अपि च। आनीता नृपकन्यका मम वशं तिष्ठतु मा वाधुनान्य
र्बंधोपि भवतु मे परिसरे जंभद्विषो वा पुरे। किं ताभिर्दशकंधरस्य कमलश्रीगर्वसर्वंकषाय
यस्याः कमनीयकंकणधरः सोयं गृहीतः करः॥१॥ वि०। किमिदं दुर्लभं गृहीतराम वेषस्य।
द०। मनुष्यवेषग्रहणं दुर्लभं यदनेनापि वा। तत्कर्ता रावणो लब्धुं जगन्मंगलदीपिकां॥ त्वर
यस्व ना वत्कौशिकवेषग्रहणाय। गृहीत एव हिमयानदीयो वेषः। सारणोपि लक्ष्मण
इव भविष्यति। सा०। अचिंत्यमहिमानो खलु महर्षयः। कांचनेकटकेनस्याः करेण प्र
तिगृह्णतः। यन्मयेव ममांगानि नश्यंते निरीक्षितुं॥१॥ पार्श्वे तो वत्सौ कथं वधु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनविलोकनकुतूहलिनीभिः कन्याभिर्विस्मृतश्चित्रपटः। तदेनं देवाय समर्पये। चित्रपटं
२० गृहीत्वा इमे एतस्याः कटके अयं च चित्रपट इति दशाननस्य निवेदयति। वि०। पश्य महाराज
पश्य। राक्षसांधंकरणमणिघटितकटकयुगुलं रघुशिशुसमधिष्ठितं चित्रपटं च। द०। धि
गेनत्कटकद्वंद्वं यन्नतन्वीमदर्शयत्। धिक् चित्रपटकं यत्र तस्याभावहरो नरः॥१॥ तमपि न
द्रक्ष्यसे यस्य धारणेन। वि०। ततश्च विमान एव निगूढं निक्षिप्यतामिदं। भविष्यति कदाचिद
नेन किंचित्प्रयोजनं। सा०। तथा करोति। द०। विमृश्य। स्फुहृदपि वंचयितव्यागत्यार्पित
नुगृहीतव्या। सांप्रतमनुभवितव्यस्तस्याः पाणिग्रहोत्सवो हि मया इति निष्क्रांताः स
र्वे॥ ॥द्वितीयोंकः॥२॥ । ततः प्रविशति मारीचो मारीचः। सोनुस्मरणं। नक्षत्रियाभं २०
कविमुक्तमहास्त्रवात्याचक्रभ्रमीकवलितश्लथसंधिबंधः। यावद्भूमाभिगगनेकथमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुराशिंनावलविश्यशतयाजनमुश्थितोस्मि ॥१॥ हंतनिरुपमपराक्रमः क्षत्रबटुः। यतः। अ
स्मिन्विरूष्य धनुरुस्रसनिबाणमुंग्रपरश्यन्बलानि पुरतो विनिपातितानि। जीमूतपंक्तिषु
निलीयनिलीय भूयो मायास्कबाहुरपिहामरणं प्रपन्नः ॥१॥ किंच। यावद्घ्राणसमीरकारित
महामायारजो दुर्दिनं नेनक्षत्रियजाल्मकेनबलिना दृष्टा पुरस्ताटकं ॥ हंतस्त्रीति जुगु
प्सया शिथिलितो मौर्वीविकर्षक्रिया वेगादुत्सृजितेन तावदिषुना सा च स्वयं च्छिद्रे ॥१॥ सशो
कवेगं हा जननि हा ताटके हा स्कन्त वत्सले हा नागसहस्रबलशालिनि नवापि क्षत्रियबटु
नानारदशो विपाक इत्ति दुरतिक्रमो दैवनियोगः ॥ अयेमातः का सिप्रदिशा हरह नो मे प्र
तिवचः। सामर्षं। विमोक्ष्य नाहं त्वां प्रथमहतेन वैरं न्यपवर्त्यो। सकरुणं। हा वा हा धिक् धिक्स्ना
यदभिमुखमेवैवमभवः ॥ सचिंतां अभ्यासं। करालत्वं वत्सगके नरंति नाद्यापि विदितः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ ततः प्रविशति करालः ॥२॥ दिष्ट्याभीतोरणमुखाद्दिष्ट्या दूरे पलायितः ॥ दिष्ट्या रामास्त्रपदवी
२१ मह्रष्टो जीवितोस्म्यहं ॥१॥ किंतु न जानामीति रामास्त्रगृहीतो मारीचो जीवतिवान्न वेति ॥ यतः ॥
प्रभ्रष्टरत्नमुकुटं पतितासिखेटं विस्रस्तकेशमभिरक्तनपाणिपादं ॥ मारीचमभ्रमिव चंडम
रुद्विधूतं चिन्त्ये ॥ क्वचिद्रघुकिशोरशरः क्षणेन ॥१॥ प्रायेण महेंद्रशैलस्य कटके महोदध
वेशिविपुवापतितः स्यात् तदेनमन्वेष्टुमुपसर्पतापि मया महेंद्रशैल आसादित एव ॥ तथा
हि ॥ एते ते गिरिकूटसंघट्टशिलासंघट्टशीर्णाभसः प्रेंखच्चामरचारुसीकरकणस्मेराद
री निर्झराः ॥ यत्रानेषु निकुंजकुंजरमुखभ्रश्यन्मृणालांकुरग्रासायंथितटंरटंनिपरि
तः कुटीरवाभैरवं ॥१॥ अपि चाम्र गपतिकराघाततुद्युत्कंठारशिरस्तटीपरिगलदसृ २१
ग्धारासत्तमौक्तिकपंक्तिः ॥ वनभुवमिभश्रेणीशोणीकृतां निजभीरुहस्तैः कलयन्तिस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुत्सर्पद्झल्लूकमल्लविराविणी ॥१॥ अथ तो वलोक्य कथमायें मारीचः समुद्रमध्यपतितोस्थि नरुव
द्दश्यते । यतः ॥ किंचास्मुकयथितत्रोवलखंडजालं फेनानुविद्धघनमेदुरकेशपाशं । नीरक्तधौ
तकरपादतलं पुरस्तादस्ते महेंद्रकटकेन नु नाटकीयः ॥१॥ मारीचः । करालं विलोक्य

K K S U LIBRARY
RAMTEK
441 106
M 1460
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 12:25
,TRANSFERRED=2020/10/05 at 12:30:45
,PAGES=42
,TYPE=STD
,NAME=S0003851
,Book Name=M-1460-JANKI PARINAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection